International Journal of Sanskrit Research 2023; 9(5): 66-69

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(5): 66-69
© 2023 IJSR
www.anantaajournal.com
Received: 01-07-2023
Accepted: 05-08-2023

**तापस-वर्मनः**
शोधच्छात्रः, यादवपुर-विश्वविद्यालयः, पश्चिम बंगाल, भारत

**Corresponding Author:**
**तापस-वर्मनः**
शोधच्छात्रः, यादवपुर-विश्वविद्यालयः, पश्चिम बंगाल, भारत

# ऋग्वेदस्य प्रथमसूक्ते अग्निशब्दस्य स्वरसमीक्षणम्

## तापस-वर्मनः

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i5b.2208

### सारांश
वेदोऽस्माकं भारतीयानां धर्मस्याधारभूतः स्तम्भः। वेदानां प्राणभूतेषु वेदाङ्गेषु शिक्षायाः प्राथमिकमेकं महत्त्वपूर्णं विशिष्टञ्च स्थानमस्ति। वैदिकमन्त्रस्य तथा पदस्य सूक्ष्मार्थप्रकाशाय अर्थनिर्णयाय च स्वरज्ञानमत्यन्तमावश्यकम्। वेदे उदात्तादीनां स्वराणां महत्त्वपूर्णं स्थानं विद्यते।

**कूटशब्द** : वेदः, स्वरः, अग्निः चेति।

### प्रस्तावना
आम्नायः, वेदः, श्रुतिः, अनुश्रवः, आगमः, इत्यादिकाः शब्दाः समानार्थका इति शब्दविदः। विद्धातोः घञ्प्रत्यये कृते ज्ञानार्थको वेदशब्दो व्युत्पद्यते। सायणाचार्यस्य मतानुसारेण तु- "अपौरुषेय वाक्यं वेदः"[१] इति वेदस्य लक्षणम्। इष्ठप्राप्त्यनिष्ठपरिहारयोरलौकिकं साधनो यो वेदयति स वेद इति सायणाचार्येण भाष्यभूमिकायाम् अभिहितम्। प्रमाणञ्च तत्रैवाह सः- "प्रत्यक्षेणानुमित्या वा यस्तुपायो न विद्यते। एवं विदन्ति वेदेन तस्माद्वेदस्य वेदतः।।"[२] इति। आपस्तम्बेन तु "मन्त्रब्राह्मणयोर्वेदनामधेयम्" (आप.यज्ञपरिभाषासूत्रम् – १/३४) इति उच्यते। संहिताब्राह्मणारण्यकोपनिषच्चतुर्विधभेदात्मको हि वेदशब्दः। संहिता छन्दोबद्धमन्त्रयुक्ता, ब्राह्मणभागो छन्दोबद्धयुक्तो गाथात्मको यागादिवर्णनपरकश्च। आरण्यकभागो छन्दोबद्धयुक्तो गाथारूपो वा विद्यते। उपनिषद्भागो तत्तत्संहितागतब्रह्मज्ञानादिविषयाणां वर्णनरूपेण सङ्कलनम्। एते चत्वारो विभागाः चतुर्षु वेदेषु समुपलभ्यन्ते।

वेदेषु स्वरपरिवर्तनैः सह अर्थपरिवर्तनं भवति। अत एव मन्त्रोच्चारणे स्वरस्य ध्यानं कर्तव्यम्। अन्यथा तु मन्त्राः विपरीतफलदायिनो भविष्यन्ति। तथा चोक्तं पाणिनीयशिक्षायाम्- "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।"[३] इति।

| | |
|---|---|
| अग्निमीळे पुरोहितं<br>यज्ञस्य देवमृत्विजम्।<br>होतारं रत्नधातमम्।।१।। | अग्निम् ईळे पुरःऽहितं<br>यज्ञस्य देवम् ऋत्विजम्।<br>होतारं रत्नऽधातमम्।।1।। |

'अग्नि' इत्यस्य अर्थवत्त्वात् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (पा.सू - १.२.४५) इति सूत्रेण प्रातिपदिकसंज्ञायां "कर्तुरीप्सिततमं कर्म" (पा.सू - १.४.४९) चेत्यनेन कर्मकारके "कर्मणि द्वितीया" (पा.सू - २.३.२) इत्यनेन द्वितीयायाः एकवचने 'अम्' इत्यादेशे 'अग्नि+अम्' इति प्राप्ते "अमि पूर्वः" (पा.सू - ७.१.१०७) इत्यनेन अमित्यस्य अकारस्य पूर्वरूपे एकादेशे "अग्निम्" इति पदं सिद्धति। "फिषोऽन्त उदात्तः" (फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति। पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन " अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१५८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषये अस्मिन् एकं सूत्रमस्ति " उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते। "अनुदात्तौ सुप्पितौ" (पा.सू - ३.१.४) इत्यनेन 'अम्' इति सुब्विभक्तेः अनुदात्तस्वरो वर्तते। तर्हि अत्र उदात्तानुदात्तयोः यकारयोः मध्ये कः स्वरः शिष्यते ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "एकादेश उदात्तेनोदात्तः" (पा.सू - ८.२.५) इति। अनेन सूत्रेण उदात्तानुदात्तयोः मध्ये यदि एकादेशो भवति तर्हि सदा उदात्तस्वरः एव शिष्यते। अतः "अग्निम्" इति अन्तोदात्तपदम्।

| | |
|---|---|
| अग्निः पूर्वेभिर्ऋषिभि<br>रीड्यो नूतनैरुत।<br>स देवाँ एह वक्षति।।२।। | अग्निः पूर्वेभिः ऋषिऽभिः<br>ईड्यः नूतनैः उत।<br>सः देवान् आ इह वक्षति।।२।। |

अग्नीत्यस्य "फिषोऽन्त उदात्तः" (फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति। पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१५८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषयेऽस्मिन् एकं सूत्रमस्ति "उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते।

| | |
|---|---|
| अग्निना रयिमश्नवत्<br>पोषमेव दिवेदिवे।<br>यशसं वीरवत्तमम्।।३।। | अग्निना रयिम् अश्नवत्<br>पोषमेव दिवेऽदिवे।<br>यशसं वीरवत्ऽतमम्।।३।। |

अग्नीत्यस्य "फिषोऽन्त उदात्तः" (फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति। पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१५८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषयेऽस्मिन् एकं सूत्रमस्ति "उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते। "अनुदात्तौ सुप्पितौ" (पा.सू - ३.१.४) इत्यनेन 'टा' इति सुब्विभक्तेः अनुदात्तस्वरो वर्तते। अत्र उदात्तात् परस्य अनुदात्तस्य कीदृशः स्वरो भवति ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "उदात्तादनुदात्तस्यस्वरितः" (पा.सू - ८.४.६६) अनेन उदात्तात् परस्य अनुदात्तस्य अर्थात् 'ना' इत्यस्य 'आ' कारस्य स्वरितस्वरो भवति।

| | |
|---|---|
| अग्ने यं यज्ञमध्वरं<br>विश्वतः परिभूयसि।<br>स इद्देवेषु गच्छति।।४।। | अग्ने यम् यज्ञम् अध्वरं<br>विश्वतः परिऽभूः असि।<br>स इत् देवेषु गच्छति।।४।। |

अग्नीत्यस्य "फिषोऽन्त उदात्तः"(फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति। पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१४८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषयेऽस्मिन् एकं सूत्रमस्ति "उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते।। परन्तु अत्र अग्ने इति पदं सम्बोधनस्य प्रथमायाः एकवचनम्। तच्च पुनरपि पादादौ अस्ति। तर्हि 'अग्ने' इति पदस्य कीदृशः स्वरः शिष्यते ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "आमन्त्रितस्य च"

(पा.सू - ६.१.१९८) इति। अनेन षाष्ठिकेन 'अग्ने' इति पदस्य पूर्वस्वरः अकारः उदात्तः स्वरः भवति। अपरः स्वरः एकारः "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१४८) इत्यनेन अनुदात्तः स्वरः भवति। अत्र उदात्तात् परस्य अनुदात्तस्य कीदृशः स्वरो भवति ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "उदात्तादनुदात्तस्यस्वरितः" (पा.सू - ८.४.६६) अनेन उदात्तात् परस्य अनुदात्तस्य ए-कारस्य स्वरितस्वरः शिष्यते।

| | |
|---|---|
| अग्निर्होता कविक्रतुः | अग्निः होता कविऽक्रतुः |
| सत्यचित्रश्रवस्तमः। | सत्यः चित्रश्रवःऽतमः। |
| देवो देवेभिरा गमत्।।५।। | देवः देवेभिः आ गमत्।।५।। |

अग्नीत्यस्य "फिषोऽन्त उदात्तः" (फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति। पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१५८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषयेऽस्मिन् एकं सूत्रमस्ति "उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते।

| | |
|---|---|
| यदङ्ग दाशुषे त्वम् | यत् अङ्ग दाशुषे त्वम् |
| अग्ने भद्रं करिष्यसि। | अग्ने भद्रम् करिष्यसि। |
| तवेत्तत्सत्यमङ्गिरः | तव इत् तत् सत्यम् अङ्गिर |
| ।।६।। | ।।६।। |

अग्नीत्यस्य "फिषोऽन्त उदात्तः"(फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति। पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१४८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषयेऽस्मिन् एकं सूत्रमस्ति "उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते।। परन्तु अत्र अग्ने इति पदं सम्बोधनस्य प्रथमायाः एकवचनम्। तच्च पुनरपि पादादौ अस्ति। तर्हि 'अग्ने' इति पदस्य कीदृशः स्वरः शिष्यते ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "आमन्त्रितस्य च" (पा.सू - ६.१.१९८) इति। अनेन षाष्ठिकेन 'अग्ने' इति पदस्य पूर्वस्वरः अकारः उदात्तः स्वरः भवति। अपरः स्वरः एकारः "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१४८) इत्यनेन अनुदात्तः स्वरः भवति। अत्र उदात्तात् परस्य अनुदात्तस्य कीदृशः स्वरो भवति ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "उदात्तादनुदात्तस्यस्वरितः" (पा.सू - ८.४.६६) अनेन उदात्तात् परस्य अनुदात्तस्य ए-कारस्य स्वरितस्वरः शिष्यते।

| | |
|---|---|
| उप त्याग्ने दिवेदिवे | उप त्वा अग्ने दिवेऽदिवे |
| दोषावस्तर्धिया वयम्। | दोषाऽवस्तः धिया वयम्। |
| नमे भरन्तो एमसि।।७।। | नमे भरन्तः आ इमसि।।७।। |

अग्नीत्यस्य "फिषोऽन्त उदात्तः"(फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति। पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१४८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषयेऽस्मिन् एकं सूत्रमस्ति "उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते।। परन्तु अत्र अग्ने इति पदं सम्बोधनस्य प्रथमायाः एकवचनम्। पदमिदं पादादौ नास्ति। तस्मात् "आमन्त्रितस्य च" (पा.सू - ८.१.१९) इत्यनेन आष्टमिकेन सूत्रेण 'अग्ने' इति पदस्य सर्वे स्वराः अनुदात्ताः भवन्ति। आद्युदात्तात् 'उप' इत्यस्मात् परस्य 'अग्ने' इति पदस्य सर्वे स्वराः संहितापाठे "स्वरितात् संहितायामनुदात्तानाम्" (पा.सू - १.२.३९) इत्यनेन सूत्रेण प्रचयस्वराः भवन्ति।

| | |
|---|---|
| स नः पिताव सूनवे- | सः नः पिता इव सूनवे |
| ऽग्ने सूपायनो भव। | अग्ने सुऽउपायनः भव। |
| सचस्वा नः स्वस्तये।।९।। | सचस्व नः स्वस्तये।।९।। |

अग्नीत्यस्य "फिषोऽन्त उदात्तः"(फिट्सूत्रम् - १.१) इत्यनेन सूत्रेण प्रातिपदिकस्य (फिषः) अन्तिमः स्वरः उदात्तो भवति।

पदेऽस्मिन् अन्तिमः फिट्स्वरः इकारः। स च उदात्तस्वरः। उदात्तस्वरं जात्यस्वरितस्वरं वा वर्जयित्वा एकस्मिन् पदे अपरे सर्वे स्वराः अनुदात्ताः भवन्ति। तेन "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१४८) इत्यनेन अकारः अत्र अनुदात्तः स्वरः। अनुदात्तस्वरस्य अकारस्य उच्चारणः कीदृशो भवति ? विषयेऽस्मिन् एकं सूत्रमस्ति "उदात्तस्वरितपूर्वस्य सन्नतरः" (पा.सू - १.२.४०) इति। अनेन उदात्तपूर्वस्य अकारस्य उच्चारणः अनुदात्ततरः भवति। स एव उच्चारणः स्वरप्रक्रियायां सन्नतरः नाम्ना परिचीयते।। परन्तु अत्र अग्ने इति पदं सम्बोधनस्य प्रथमायाः एकवचनम्। तच्च पुनरपि पादादौ अस्ति। तर्हि 'अग्ने' इति पदस्य कीदृशः स्वरः शिष्यते ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "आमन्त्रितस्य च" (पा.सू - ६.१.१९८) इति। अनेन षाष्ठिकेन 'अग्ने' इति पदस्य पूर्वस्वरः अकारः उदात्तः स्वरः भवति। अपरः स्वरः एकारः "अनुदात्तं पदमेकवर्जम्" (पा.सू - ६.१.१४८) इत्यनेन अनुदात्तः स्वरः भवति। अत्र उदात्तात् परस्य अनुदात्तस्य कीदृशः स्वरो भवति ? विषयेऽस्मिन् पाणिनेः एकं सूत्रमस्ति "उदात्तादनुदात्तस्यस्वरितः" (पा.सू - ८.४.६६) अनेन उदात्तात् परस्य अनुदात्तस्य ए-कारस्य स्वरितस्वरः शिष्यते।

स्वरेण 'ओम्' इत्युच्यते। विषयेऽस्मिन् छान्देपनिषदि – - "एष उ स्वरो यदेतदक्षरमातदमृतमभयम्" इति। मरणात् भयं सर्वादौ छन्दं निकषा देवताभिः गतम्।यदा छन्दं निकषा आच्छादित्वात् आत्मरक्षया न भूयते तदा ऋक्सामयजुर्वेदणाम् उपर्युत्तिष्ठत्वात् स्वरे प्रविष्टम्। तस्मात् 'ओं' कारे आश्रयभूत्वा देवताभिः अमृताभयौ प्राप्तै। वैदिकसाहित्ये स्वरस्य भूमिका अनस्वीकार्य्या। अशुद्दस्वरप्रयोगेण मन्त्रः न केवलम् निर्थकोऽपि च विपरितेन फलदायकेन भूयते। यथा सर्वरोगहरणः औषधौऽपि परिमाणस्य तार्तम्ये प्राणघातः भवेत्। तेन वैदिकमन्त्राणां स्वरप्रयोगः कर्तव्यः।

## तथ्यसूत्रम्

१. ऋग्वेद्-भाष्योपक्रमणिका, पत्राङ्कः – १२
२. याज्ञवल्क्य संहिता
३. पाणिनीय शिक्षा, श्लोकः – ५२

## सन्दर्भ

1. ऋग्वेदसंहिता, मोक्षमूलर (सम्पादक), वाराणसी : चौखाम्बा सुरभारती प्रकाशन, २०१४।
2. पाणिनि, २०१७, अष्टाध्यायी, तपनशङ्करः भट्टाचार्यः (सम्पादक), कलकाताः संस्कृत वुक् डिपो।
3. पिङ्गलाचार्यः, पाणिनीय शिक्षा, अशोक-कुमार वन्दोपाध्यायः, कलकाता, सदेश,२००८।
4. भट्टाचार्यः, तपनशङ्करः, २०१६, वैदिकव्याकरणम्, कलकाताः संस्कृत वुक् डिपो।
5. भट्टोजिदीक्षित्, वैयाकरणसिद्धान्तकौमुदी, लक्ष्मी शर्मा (सम्पादका), वाराणसी, चौखम्बा सुरभारती प्रकाशन, २०१६।
6. विश्वास, दीधिति, २०१३, वैदिक पाठसञ्चयन, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षत्।
7. शान्तनवाचार्य, २००८, फिट्सूत्रपाठः, सोमलेखा (सम्पादका), दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान।
8. सायणाचार्यः, ऋग्वेद्-भाष्योपक्रमणिका, शान्ति वन्धोपाध्याय (सम्पादका), कलकाता संस्कृतपुस्तक भाण्डार, २०१० ।